# श्री शारदा भुजंग प्रयात स्तुतिः

### श्री शारदा भुजंग प्रयात स्तुतिः

स्मितोद्भूतराकानिशानायकायै
कपोलप्रभानिर्जितादर्शकायै |
स्वनेत्रावधूतांगजातध्वजायै
सरोजोत्थसत्यै नमः शारदायै || 1 ||

भवांभोधिपारं नयंत्यै स्वभक्ता-
-न्विनायासलेशं कृपानौकयैव |
भवांभोजनेत्रादिसंसेवितायै
अजस्रं हि कुर्मो नमः शारदायै || 2 ||

सुधाकुंभमुद्राविराजत्करायै
व्यथाशून्यचित्तैः सदा सेवितायै |
क्रुधाकामलोभादिनिर्वापणायै
विधातृप्रियायै नमः शारदायै || 3 ||

नतेष्टप्रदानाय भूमिं गतायै
गतेनाच्छबर्हाभिमानं हरंत्यै |
स्मितेनेंदुदर्पं च तोषं व्रजंत्यै
सुतेनेव नम्रैर्नमः शारदायै || 4 ||

नतालीयदारिद्र्यदुःखापहंत्र्यै
तथा भीतिभूतादिबाधाहरायै |
फणींद्राभवेण्यै गिरींद्रस्तनायै
विधातृप्रियायै नमः शारदायै || 5 ||

सुधाकुंभमुद्राक्षमालाविराज-
-त्करायै करांभोजसम्मर्दितायै |
सुराणां वराणां सदा मानिनीनां
मुदा सर्वदा ते नमः शारदायै || 6 ||

समस्तैश्च वेदैः सदा गीतकीर्त्यै
निराशांतरंगांबुजातस्थितायै |
पुरारातिपद्माक्षपद्मोद्भवाद्यै-
-र्मुदा पूजितायै नमः शारदायै || 7 ||

अविद्याऽऽपदुद्धारबद्धादरायै
तथा बुद्धिसंपत्प्रदानोत्सुकायै |
नतेभ्यः कदाचित्स्वपादांबुजाते
विधेः पुण्यतत्यै नमः शारदायै || 8 ||

पदांभोजनम्रान्कृते भीतभीतान्
द्रुतं मृत्युभीतेर्विमुक्तान्विधातुं |
सुधापूर्णकुंभं करे किं विधत्से
द्रुतं पाययित्वा यथातृप्ति वाणि || 9 ||

महांतो हि मह्यं हृदंभोरुहाणि
प्रमोदात्समर्प्यासते सौख्यभाजः |
इति ख्यापनायानतानां कृपाब्धे
सरोजान्यसंख्यानि धत्से किमंब || 10 ||

शरच्चंद्रनीकाशवस्त्रेण वीता
कनद्धर्मयष्टेरहंकारभेत्री |
किरीटं सताटंकमत्यंतरम्यं
वहंती हृदब्जे स्फुरत्वंब मूर्तिः || 11 ||

निगृह्याक्षवर्गं तपो वाणि कर्तुं
न शक्नोमि यस्मादवश्याक्षवर्गः |
ततो मय्यनाथे दया पारशून्या
विधेया विधातृप्रिये शारदांब || 12 ||

कवित्वं पवित्वं द्विषच्छैलभेदे
रवित्वं नतस्वांतहृद्ध्वांतभेदे |
शिवत्वं च तत्त्वप्रबोधे ममांब
त्वदंघ्र्यब्जसेवापटुत्वं च देहि || 13 ||

विलोक्यापि लोको न तृप्तिं प्रयाति
प्रसन्नं मुखेंदुं कलंकादिशून्यं |
यदीयं ध्रुवं प्रत्यहं तां कृपाब्धिं
भजे शारदांबामजस्रं मदंबां || 14 ||

पुरा चंद्रचूडो धृताचार्यरूपो
गिरौ शृंगपूर्वे प्रतिष्ठाप्य चक्रे |
समाराध्य मोदं ययौ यामपारं
भजे शारदांबामजस्रं मदंबां || 15 ||

भवांभोधिपारं नयंत्यै स्वभक्तान्
भवांभोजनेत्राजसंपूज्यमानां |
भवद्भव्यभूताघविध्वंसदक्षां
भजे शारदांबामजस्रं मदंबां || 16 ||

वराक त्वरा का तवेष्टप्रदाने
कथं पुण्यहीनाय तुभ्यं ददानि |
इति त्वं गिरां देवि मा ब्रूहि यस्मा-
-दघारण्यदावानलेति प्रसिद्धा || 17 ||

इति श्रीसच्चिदानंदशिवाभिनवनृसिंहभारतीस्वामिभिः विरचिता श्री शारदा भुजंग प्रयात स्तुतिः |